IJETIR

ISSN (Online) 2583-0554

IJETIR

Impact Factor: 5.731

International Journal of Emerging Technologies and Innovative Research (IJETIR)

Volume 5, Issue 5, May 2025

# रसनिरुपणम्

**अमरेन्द्र कुमार मिश्रः**

**सहाचार्य (साहित्य विभागः)**

**कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालयः**

**पूर्वमेदिनीपुरं, पश्चिमबङ्गः**

**रसा: -** नाट्यमये संस्कृत काव्यशास्त्रीयग्रन्थेषु रसवादसिद्धान्तोऽसंख्यमत - मतान्तरमवलोक्यते। सर्वत्र कश्च रस:? कति रसा: कथं च तस्य विकास: कथं च तस्यानुभूति: जायते, कथं च नाट्ये काव्ये च रसोद्वोथो जायते, कथं च समाजिकै: साकं तस्य रसस्य कृते साधारणीकरणमित्येते विषया: वर्तन्ते।

काव्याधारशिला रस एव। सामान्यत: रसाश्चत्वार: सन्ति। पदार्थरसा: - मधुरतिक्ताम्लप्रभृतय:, आयुर्वेदशास्त्रीय रसा: - रसराजरस: बसन्तमालतीरसादय:।

मुक्तिमार्गात्मक: - भक्तिरस: ,तथा च साहित्यशास्त्रीयरस: - काव्यसौन्दर्यम् , काव्यास्वाद: ब्रह्मास्वाद - सहोदर:, काव्यानन्दप्रभृतय: ।

**वेदे रसोयथा** - महे यत् पितर्ह रसं दिवे करवत्सरत् ।

यो नो रसं दित्सति पित्वो अग्ने यो अश्वानां योगत्वा यस्तनूनाम् ।

तं गोभिर्विर्षणं रसं मदाय देवबीतये, सुतंभराम संसृज ।

सोमो भवन्ति वर्णसिर्दधान इन्द्रियं रस सुवीरो अभिशस्तिषा: ।

एभिरूक्तैर्मन्त्रै: स्पष्टं प्रतीयते रसस्यार्थो द्रवरूप: बनस्पतेस्तत्वम् सोमरस: । फलत: वैदिकयुगेऽपि रस आस्वादरूप: यस्य क्रमश: विकासो जात: ।

उपनिषद्काले रस: -

अस्मिन् कालेऽपि रसशब्द: व्याप्तआसीत् । यथा - औषधीभ्योऽन्नम् , अन्नाद्रेत: रेतस: पुरूष: स वा एष पुरूषोऽन्नरसमय: ।

१. ऋग्वेद - १/७१/५

२. ऋग्वेद - ७/१०४/१०

३. ऋग्वेद - ६/६/६

४. ऋग्वेद - ६/१३/५

**भक्तिरस:**

भक्तिरपि रस:। भक्तेरपि स्थायिभाव: भगवद्विषयिकारतिरिति। यद्यपि - साहित्यशास्त्रे रससिद्धान्त प्रतिपादकेषु मूर्धन्यग्रन्थेषु सर्वत्र नवरसानामेव चर्चा। भरतमुनेर्नाट्यशास्त्रादारभ्य पण्डितराजजगन्नाथस्य रसगंगाधरपर्यन्तं प्रायोऽयमेव सिद्धान्तो दृश्यते। कुत्रापि भक्तिरसस्य पृथग् रूपेण चर्चा न समायाता।

पंचदशखीस्ताब्दमध्ये वैष्णवधर्माचार्य श्रीमद्रूपगोस्वामिपादा: महान्त: विद्वांस: अलंकर शास्त्रस्यापि, तेषां भक्तिरसामृतसिन्धु: , उज्ज्वनीलमणिश्च द्वौ मूर्धन्यग्रन्थौ विद्येते। यौ हि रसवादप्रतिपादकसिद्धान्तेषु सर्वथा नवीनं पन्थानं प्रतिपादितवन्तौ।

तत्र भगवता रूपगोस्वामिना '' मधुराख्यो भक्तिरसो मुख्यत्वेन प्रतिपादित:। भक्तिरस: एवाङ्गीभूतस्तदङ्गत्वेनैवान्ये सर्वेऽपि रसा: वर्तन्ते भक्तिरसधुर्यामेव सर्वे रसा: चक्रवत् परिभ्रमन्ति इति प्रतिपादिता। तत्र तेन रस - सिद्धान्तसापरम्परगतपद्धतिं परित्यज्य विलक्षण: पन्थ: अनुसृत: ।

ग्रन्थकारेण भक्तिरसामृतसिन्धौ भक्ति - रसस्य संक्षेपेण वर्णनं कृतम् । उज्ज्वलनीमणावपि तस्यैव विस्तारो। विहित: मधुरत्वेन प्रतिपादितस्य भक्तिरसस्य शान्तप्रेयोवत्सलोज्ज्वल - नामका: प्रमुखरसा: वर्तन्ते, तेष्वपि सर्वप्रमुख: मधुराख्यों भक्तिरस:, स एव रसराडिति शब्देनापि व्यवहृत: ।

मधुराख्योऽयं रस: सर्वथा गोपनीयोऽतिरहस्य: मतश्च। अतएव देश काल पात्रादि विशेषे रहस्योऽयं मधुराख्यो भक्तिरस: सर्वोत्कर्षेण वर्तते।

सोऽयं मधुराख्यो रस: वक्ष्ममाणैर्विभावाद्यै: एवास्वाद्यतां मधुराइति भक्ति रस: प्रोक्तो मधुराख्यो मनीषिभि: इति।

रसनिष्पत्ति - प्रतिक्रिया - प्रदर्शिता । तत्र विभावानुभावव्यभिचारिभावानां - स्वरूपम् -

'' तत्र ज्ञेया विभावास्तु रत्यास्वादनहेतव: ।
ते द्विधालम्बना एके तथैवोद्वीपना: परै।।
कृष्णश्च कृष्णभक्तश्च बुधैरालम्बता मता:।
रत्यादेर्विषयत्वेन तदाधारतापि च ।।

तद्भावभावितस्वान्ता: कृष्णभक्तां इतीरता।
उद्यीपनास्ते प्रोक्ता: भावमुद्यीपयन्ति ये।।
ते तु श्रीकृष्णचन्द्रस्य गुणाश्चेष्टा: प्रसाधनम् ।।
अनुभावास्तु चितस्थ भावानामनुबोधका: ।
ते वहिर्विक्रियाप्राया: प्रोक्ता उद्भास्वराख्यया।।
भावेश्चितमिहाकान्तं सत्वमित्युच्यते बुधै:।
सत्वादस्मात् समुत्पन्ना: ये भावा सात्विका: स्मृता:।।
अथोच्यन्ते त्रयस्त्रिंशदभावा ये व्यभिचारिण:
उन्मज्जन्ति निमज्जन्ति स्थायिन्यमृतवारिधौ।
उर्मिभिवद्वर्धयन्त्येनं यान्ति तद्रूपत्तां च ते।
निर्वेदोऽथ विषाद इत्यादय:।
मिथो हरेर्मृगाक्ष्याश्च संभोगोत्थादिकारणम् ।
मथुरा परपर्याया प्रियताख्योदिता रति:।।

---

१. उज्जवनी लमणित: -

उपर्युक्तविभावानुभावसात्विक भावानामलौकिक - साहचर्येणभिव्यक्त: मथुराख्यारति - स्थायिभाव: मधुर रसरूपे परिणमति यश्चभक्तिरस: । स एव रसराट् तस्मिन्नेव सर्वेषांरसानामन्तभाव इति।

**भरतनाट्यशास्त्रे रसविचार:**

नाट्यशास्त्रे ३६ षट्त्रिंशदध्याया: विद्यन्ते। तेषु षष्ठाध्याय: सविशेषं रससिद्धान्तप्रसङ्गे विराजते। तत्र प्रथम पंचाध्यायेषु मुनिना भरतेन नाट्यशास्त्रविषये स्वविचारा: प्रकाशिता:।

विद्वांस: रसशब्देन यस्य प्रयोगं कुर्वते क: स: रस इति जिज्ञासायामुच्यते-

'' जग्राह पाठ्यमृग्वेदात् सामभ्यगीतमेव च।
यजुर्वेदादभिनय: रसानथर्वणादिह ।।

अत्र ''रसानार्थवणात्'' इति ये रसा उक्तास्ते प्रसिद्धा एव। लोके षट्रसा अम्लतिक्तादय: । एते न प्रकृतौ न वा विकृतौयुक्ता: येच तत्रापिरसनेन्द्रिय ग्राहयगुणे एव रस - शब्द - प्रयोग: पत्रापितत्र श्रृंगारादौ रसशब्दास्ते न रसनेन्द्रियग्राहया: ।

रसशब्दप्रयोगस्तु -

IJETIR ISSN (Online) 2583-0554
Impact Factor: 5.731
International Journal of Emerging Technologies and Innovative Research (IJETIR)
Volume 5, Issue 5, May 2025

श्रृंगारहास्यकरूणरौद्रवीरभयानका: ।

विभत्साद्भुतसंज्ञौ चेत्येस्टौ नाटये रसा: स्मृता: ।।

'' विभावानुभाव व्यभिचारिसंयोगाद्रसनिष्पत्ति:'' इति रसनिष्पत्तौ स्वीकृतायां विविधप्रक्रियायां मूलं सूत्रमिदम् । एतद् व्याख्यानेऽभिनवभारती प्रतिपादयति-

'' अनुमानागमयोगी प्रत्यक्षादिकारण - तटस्थ -प्रमातृप्रमेयपरकीय - लौकिकचित्तवृत्तिविलक्षणतया निर्वास माना परिमितस्वात्माश्रयतानिर्वासनाविरहाच्च लौकिकप्रमदादिजनितनिजरतिशोकादिवत् चितवृत्यन्तर जनताक्ष्मानिर्विघ्न - स्वसंवेदनात्मकविश्रान्तिलक्षणेन रसनापरपर्यायेषा व्यापारेण गृह्यमानत्वात् ।''रसशब्देनाभिधीयते इति भरतमुनि:।।

इत्थं हि रस एव नाटयम् यस्यानुभूतिरेव फलम् इति।

## रसस्य प्रसिद्धा व्याख्या

नाट्यशास्त्रमनुसृत्यास्वादपदवीं दधानं रसपदाभिधेयं कमपि पदार्थमभ्युपगच्छन्ति केथनाचार्या। तादृशरस- पदार्थस्वरूपे स्थायिभावस्य रसत्वं व्याचक्षाणानामप्या चार्याणां तत्तत्कल्पनाप्रौढिपरम्परया महान् प्रक्रिया भेद: परिदृश्यते । तत्र पण्डितराजजगन्नाथस्य रसगंगाधरे नव्यन्यायादिदार्शनिकभाषाया निरूक्तरसविवेक: आधुनिकमनोविज्ञानशास्त्रस्यापि क्रीडनमसूचयत् । भारतीयदर्शनशास्त्रेषु विविधभेदभिन्नानां ज्ञानानां क्रमिककार्य कारणकल्पनामूला मानस्य : प्रक्रिया नैकप्रकारा: वर्णिता:विद्यन्ते। ता: प्रक्रिया मानसस्य विषय: । एषा अपि प्रक्रिया दर्शनभेदेन किंचित् विभिद्यन्ते। समे च दार्शनिका:स्वस्वप्रक्रियां समुचित मेनं रसं सस्वट्: । पण्डितराजगन्नाथेन अभिनवगुप्तनिर्दिष्टाचार्याणां मतानि विवेचितानि। तत्र तेन महाशयेन यद्यपि ''एकादशमतानि'' विवेचितानि, परंच प्रसिद्धतया केवलचत्वारि एव मतानि मयोपस्थाप्यन्तेऽत्र। ऐतानि चत्वारि मतानि वर्तन्ते भट्टलोल्लट - शंकुक् -भट्टनायक - अभिनवगुप्ताचार्याणाम् । अत: एतेषामाचार्याणांमतानि यथा काव्यप्रकाशदिषु साहित्यग्रन्थेषूपलभ्यन्ते। तदग्रन्थानुपलम्भात न तथैबोपस्थाप्यन्ते अपितु एतेषां मतामाधारीकृत्य रसविवेचनं कृतमिति मन्यते।

**भट्टलोल्लटमतम् - अथवा उत्पत्तिवाद:**

रत्यादिस्थायिभावेन सह विभावानुभावव्यभिचारिभावानां संयोगात् रसस्य उत्पत्ति: भवति इदमेव वर्णितं तै: ''विभावैर्ललनोद्यानादिभि:'' व्याख्यानै:। आचार्यस्यस्य मतं रसगंगाधरकारेणोद्धृतं इत्थम् ''मुख्यतया दुष्यन्तादिगतएव रसो रत्यादि: कमनीय विभावाद्यभिनयप्रदर्शन कोविदे दुष्यन्ताद्यनुकर्तरि नटे समारोप्य साक्षात्क्रियते । इत्येके ''

अस्यां व्याख्यायां विभावेन सह रत्यादि: स्थायिभावस्य संयोग उत्पाद्योत्पादविषयक: सम्बन्ध:, अनुभावेन सह गम्यगमकभावसम्बन्ध: तथा व्याभिचारिभावेन सह पोष्यपोषकभावसम्बन्ध:, संयोग शब्देनाभिप्रेत:।

१. मम्मटकाव्यप्रकाशस्य चतुर्थोत्लासे

२. रसगंगाधर - १२४ पृष्ठे: प्रथमानने।

अत एव जनित अभित: प्रतीतियोग्यकृत: तथा च उपचित: इति पदानां प्रयोग:।

भट्टलोल्लटस्यास्मिनन् विश्लेषणे रस: मुख्यरूपेणानुकार्ये रामे तस्यानुकर्तरि नटेऽपि च रस: जायते। इति।

**शङ्कुकमतम् अथवा अनुमितिवाद:**

आचार्य शङ्कुक: नैयायिक: फलत: एतेषां मते रसस्यानुमिति: साच कथमिति व्याश्यायते- ''अयमेवराम: राम एवायं इतिसम्यग् , न रामोऽयमित्युत्तरकालिकबाधोमिथ्या, राम: स्याद् वा न वाऽयमिति संशय:,राम सदृशोयमिति सादृश्यमत: सम्यक्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्या ग्राहये नटे शिक्षाभ्यासादिनासम्पादितादभिनयकार्यप्रकटनेन नटेन कृत्रिमैरपि अकृत्रिमवत् प्रतिभासमानै: विभावादिभि: कारणकार्यसहकारिभि: संयोगेन गम्य- गमकभावसम्बन्धेन अनुमीयमानोऽपि रस: वस्तुसौन्दर्येण आस्वाद्यविषयत्वेनान्यानुमानविलक्षण: स्थायिरूपेण सम्भाव्यमान: रस: सामाजिकै: वासनया स्वाद्यमान: रस: इति।

श्रीशङ्कुकस्यायं भाव: यत् यथा चित्रस्थे तुरगे अयं तुरग:, नायं तुरग:, तुरगोऽयं न वा तथा तुरग सदृशोऽयमिति सत्यमिथ्यासंशयादृश्यरूपाद्भिन्न: विलक्षण:, तथैव रामाद्यनुकारिनटादिरूप - कृत्रिमालम्बनेनाप्यकृत्रिमवदावग्रहलकृत्रिमस्मितकटाक्षादिभिरपि इयं सीता रामविषयकरतिमती वा अयं राम: सीताविषयक् रतिमान वा विलक्षण स्मितकटाक्षरतिमत्वात् '' इति व्याप्तया अनुमानिको रस:।।

विषयोऽयं रसगंगाधरकारेण उच्यते - ''दुष्यन्तादिगतो रत्यादिर्नटे पक्षे दुष्यन्तत्वेन गृहीते, विभावादिभि: कृत्त्रिमैरप्यकृत्रिमतयागृहीतै: भिन्ने विषयेऽनुमितिसामग्रया बलवत्वादनुमीयमानो रस:।। इत्यपरे ।

**भट्टनायकमतम् अथवा भुक्तिवाद:**

भट्टनायकस्तु नूतनं पन्धानमनुसृतवान् । स पन्था: भुक्तिवाद:। भट्टनायकस्याशयो यत् रसनिष्पत्ति: नानुकार्ये न चानुकर्तरि। अनुकार्यानुकर्तारौ तटस्थौ उदासीनौ च । न तयो: रसानुभूति:। रसानुभूतिस्तु सामाजिकानां जायेते। अतएव तेनोक्तं रस: नोत्पद्यते न प्रतीयते।

भट्टनायकानुसारं भावकत्व - व्यापारेण काव्यार्थस्य साधारणीकरणं जायते तथा भोजकत्वनामक

१.रसगंगाधरे - १२४ पृष्ठे प्रथमानने।

तृतीयव्यापारेण सामाजिक: साक्षात्कारात्मकं रसं भुनक्ति।

एतावेव भट्टनायकस्य साधारणीकरणात्मकभावकत्वभोजकत्वव्यापारौ ।। सरगंगाधरे भट्टनायकसम्मतुं रसस्वरूपमुपन्यस्यति '' तस्मादभिधया निवेदिता: पदार्था: भावकत्वव्यापोरणागम्यत्वादिरसविरोधिज्ञान - प्रतिबन्ध - द्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेनावस्थाप्यन्ते। एवं साधारणीकृतेषु दुष्यन्त - शकुन्तला - देश - काल - वयोवस्थादिषु पड्गौ पूर्वव्यापारमहिम्नि तृतीयस्य भोगकृत्वव्यापारस्य महिम्ना, निगीर्णयो रजस्तमसोरूद्रिक्तसत्वजनितेन निजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीत: साधारणात्मा इत्यादि स्थायी रस:।।

**सन्दर्भ ग्रन्थ सूची**


| **ग्रन्थ का नाम** | **व्याख्याकार / सम्पादक** | **प्रकाशक** | **वर्ष** |
|---|---|---|---|
| रसगंगाधर | श्री मदनमोहनझा | चौखम्भा सं. | १९८७ |
| चित्रमीमांसा | श्री जगदीशचन्द्र | चौ. सं. सी. | १९७१ |
| कुवलयानन्द | डॉ. भोलाशंकर व्यास | चौ. वि. भ. | १९९२ |
| चन्द्रालोक | डॉ. चन्द्रमौलि द्विवेदी | भारतीविद्यासंस्थान | १९९१ |
| रसगंगाधर | भट्टमथुरानाथशास्त्री | मोतीलाल | १९८२ |
| हर्षचरितम | श्रीकान्त पाण्डेय | ज्ञानप्रकाश (मेरठ) | |